# ऋषिमण्डल-स्तोत्रम्
# Ṛṣimaṇḍala-Stōtram

आद्यंताक्षरसंलक्ष्यमक्षरं व्याप्य यत्स्थितम् |
अग्निज्वालासमं नादं बिन्दुरेखासमन्वितम् ||१||
Adyantākṣarasanlakṣyamakṣaraṁ vyāpya yatsthitam |
Agnijvālāsamaṁ nādaṁ bindurēkhāsamanvitam ||1||

अग्निज्वाला-समाक्रान्तं मनोमल-विशोधनम् |
दैदीप्यमानं हृत्पद्मे तत्पदं नौमि निर्मलम् ||२|| युग्मम् |
Agnijvālā-samākrāntaṁ manōmala-viśōdhanam |
Daidīpyamānaṁ hr̥tpadmē tatpadaṁ naumi nirmalam ||2|| Yugmam |

ॐ नमोऽर्हद्भ्य : ईशेभ्य: ॐ सिद्धेभ्यो नमो नम: |
ॐ नम: सर्वसूरिभ्य: उपाध्यायेभ्य: ॐ नम: ||३||
Ōṁ namō•r'hadbhya: R'iśēbhya: Ōṁ sid'dhēbhyō namō nama: |
Ōṁ nama: Sarvasūribhya: Upādhyāyēbhya: Ōṁ nama: ||3||

ॐ नम: सर्वसाधुभ्य: तत्त्वदृष्टिभ्य: ॐ नम: |
ॐ नम: शुद्धबोधेभ्यश्चारित्रेभ्यो नमो नम: ||४|| युग्मम् |
Ōṁ nama: Sarvasādhubhya: Tattvadr̥ṣṭibhya: ōṁ nama: |
Ōṁ nama: Śud'dhabōdhēbhyaścāritrēbhyō namō nama: ||4|| Yugmam |

श्रेयसेऽस्तु श्रियेऽस्त्वेतदर्हदाद्यष्टकं शुभम् |
स्थानेष्वष्टसु संन्यस्तं पृथग्बीजसमन्वितम् ||५||
Śrēyasēastu śriyēastvētadar'hadādyaṣṭakaṁ śubham |
Sthānēṣvaṣṭasu sann'yastaṁ pr̥thagbījasamanvitam ||5||

आद्यं पदं शिरो रक्षेत् परं रक्षतु मस्तकम् |
तृतीय रक्षेन्नेत्रे द्वे तुर्यं रक्षेच्च नासिकाम् ||६||
Ādyaṁ padaṁ śirō rakṣēt paraṁ rakṣatu mastakam |
Tr̥tīya rakṣēnnētrē dvē turyaṁ rakṣēcca nāsikām ||6||


All copyrights reserved © 2Alotus

पंचमं तु मुखं रक्षेत् षष्ठं रक्षतु कण्ठिकाम् |
सप्तमं रक्षेन्नाभ्यंतं पादांतं चाष्टमं पुन: ||७|| युग्मम् |

Pañcamaṁ tu mukhaṁ rakṣēt ṣaṣṭhaṁ rakṣatu kaṇṭhikām |
Saptamaṁ rakṣēnnābhyantaṁ pādāntaṁ cāṣṭamaṁ puna: ||7|| Yugmam |

पूर्व प्रणवत: सांत: सरेफो द्वित्रिपंचषान् |
सप्ताष्टदशसूर्यांकान् श्रितो बिन्दुस्वरान् पृथक् ||८||

Pūrva praṇavata: Sānta: Sarēphō dvitripañcaṣān |
Saptāṣṭadaśasūryānkān śritō bindusvarān pṛthak ||8||

पूज्यनामाक्षराद्यास्तु पंचदर्शनबोधकम् |
चारित्रेभ्यो नमो मध्ये ह्रीं सांतसमलंकृतम ||9||

Pūjyanāmākṣarādyāstu pañcadarśanabōdhakam |
Cāritrēbhyō namō madhyē hrīṁ sāntasamalaṅkṛtama ||9||

*जाप्य मंत्र:- ॐ ह्रां ह्रीं ह्रुं ह्रूं ह्रें ह्रैं ह्रौं ह्र: अ सि आ उ सा सम्यग्दर्शन- ज्ञान-चारित्रेभ्यो ह्रीं नम:।*

*Jāpya mantra:- Ōṁ hreen hrīṁ hruṁ hrūṁ hrēṁ hraiṁ hrauṁ hra: A si ā u sā samyagdarśana-jñāna-cāritrebhyō hrīṁ nama: |*

जंबूवृक्षधरो द्वीप: क्षारोदधि समावृत: |
अर्हदाद्यष्टकैरष्ट - काष्ठाधिष्ठैरलंकृत: ||१||

Jambūvṛkṣadharō dvīpa: Kṣārōdadhi samāvṛta: |
Ar'hadādyaṣṭakairaṣṭa - kāṣṭhādhiṣṭhairalaṅkṛta: ||1||

तन्मध्ये संगतो मेरु: कूटलक्षैरलंकृत: |
उच्चैरुच्चैस्तरस्तार: तारामंडलमंडित: ||२||

Tanmadhyē saṅgatō mēru: Kūṭalakṣairalaṅkṛta: |
Uccairuccaistarastāra: Tārāmaṇḍalamaṇḍita: ||2||

तस्योपरि सकारांतं बीजमध्यास्य सर्वगम् |
नमामि बिम्बमाहर्त्यं ललाटस्थं निरंजनम् |३| विशेषकम् |

Tasyōpari sakārāntaṁ bījamadhyāsya sarvangam |
Namāmi bimbamāhartyaṁ lalāṭasthaṁ nirañjanam |3| Viśēṣakam |


All copyrights reserved © 2Alotus

अक्षयं निर्मलं शांतं बहुलं जाड्यतोज्झितम् |
निरीहं निरहंकारं सारं सारतरं घनम् ||४||
Akṣayaṁ nirmalaṁ śāntaṁ bahulaṁ jāḍyatōjjhitam |
Nirīhaṁ nirahaṅkāraṁ sāraṁ sārataraṁ ghanam ||4||

अनुश्रुतं शुभं स्फीतं सात्त्विकं राजसं मतम् |
तामसं विरसं बुद्धं तैजसं शर्वरीसमम् ||५||
Anuśrutaṁ śubhaṁ sphītaṁ sāttvikaṁ rājasaṁ matam |
Tāmasaṁ virasaṁ bud'dhaṁ taijasaṁ śarvarīsamam ||5||

साकारं च निराकारं सरसं विरसं परम् |
परापरं परातीतं परं परपरापरम् ||६||
Sākāraṁ ca nirākāraṁ sarasaṁ virasaṁ param |
Parāparaṁ parātītaṁ paraṁ paraparāparam ||6||

सकलं निष्कलं तुष्टं निर्भतं भ्रान्तिवर्जितम् |
निरंजनं निराकांक्षं निर्लेपं वीतसंशयम् ||७||
Sakalaṁ niṣkalaṁ tuṣṭaṁ nirbhataṁ bhrāntivarjitam |
Nirañjanaṁ nirākāṅkṣaṁ nirlēpaṁ vītasanśayam ||7||

ब्रह्माणमीश्वरं बुद्धं शुद्धं सिद्धमभंगुरम् |
ज्योतीरूपं महादेवं लोकालोकप्रकाशकम् ||८|| कुलकम् |
Brahmāṇamīśvaraṁ bud'dhaṁ śud'dhaṁ sid'dhamabhaṅguram |
Jyōtīrūpaṁ mahādēvaṁ lōkālōkaprakāśakam ||8|| Kulakam |

अर्हदाख्य: सवर्णान्त: सरेफो बिंदुमंडित: |
तुर्यस्वरसमायुक्तो बहुध्यानादिमालित: ||९||
Ar'hadākhya: Savarṇānta: Sarēphō bindumaṇḍita: |
Turyasvarasamāyuktō bahudhyānādimālita: ||9||


All copyrights reserved © 2Alotus

एकवर्णं द्विवर्णं च त्रिवर्णं  तुर्यवर्णकम् |
पंचवर्णं महावर्णं सपरं च परापरम् ||१०||  युग्मम् |
Ēkavarṇaṁ dvivarṇaṁ ca trivarṇa turyavarṇakam |
Pañcavarṇaṁ mahāvarṇaṁ saparaṁ ca parāparam ||10 || Yugmam |

अस्मिन् बीजे स्थिता: सर्वे ऋषभाद्या जिनोत्तमा: |
वर्णैर्निजैर्निजैर्युक्ता ध्यातव्यास्तत्र संगता: ||११||
Asmin bījē sthitā: Sarvē ṛṣabhādyā jinōttamā: |
Varṇairnijairnijairyuktā dhyātavyāstatra saṅgatā: ||11||

नादश्चंद्रसमाकारो बिंदुर्नीलसमप्रभ: |
कलारुणसमासांत: स्वर्णाभ: सर्वतोमुख:  ||१२||
Nādaścandrasamākārō bindurnīlasamaprabha: |
Kalāruṇasamāsānta: Svarṇābha: Sarvatōmukha: ||12||

शिर: संलीन ईकारो विनीलो वर्णत: स्मृत: |
वर्णानुसारिसंलीनं तीर्थकृन्मंडलं नम:  ||१३||  युग्मम् |
Śira: Sanlīna ikārō vinīlō varṇata: Smṛta: |
Varṇānusārisanlīnaṁ tīrthakṛnmaṇḍalaṁ nama: ||13|| Yugmam |

चंद्रप्रभपुष्पदन्तौ नादस्थितिसमाश्रितौ |
बिंदुमध्यगतौ नेमिसुव्रतौ जिनसत्तमौ  ||१४||
Candraprabhapuṣpadantau nādasthitisamāśritau |
Bindumadhyagatau nēmisuvratau jinasattamau ||14||

पद्मप्रभवासुपूज्यौ कलापदमधिश्रितौ |
शिर ई  स्थितसंलीनौ  सुपार्श्वपार्श्वौ जिनोत्तमौ  ||१५||
Padmaprabhavāsupūjyau kalāpadamadhiśritau |
Śira i sthitasanlīnau supārśvapārśvau jinōttamau ||15||


All copyrights reserved © 2Alotus

शेषास्तीर्थंकरा: सर्वे हरस्थाने नियोजिता: |
मायाबीजाक्षरं प्राप्ताश्चतुर्विंशतिरहंताम् ||१६||
Śēṣāstīrthankarā: Sarvē harasthānē niyōjitā: |
Māyābījākṣaraṁ prāptāścaturvinśatirahantām ||16||

गतरागद्वेषमोहा: सर्वपापविवर्जिताः |
सर्वदा सर्वलोकेषु ते भवंतु जिनोत्तमा: ||१७|| कलापकम् |
Gatarāgadvēṣamōhā: Sarvapāpavivarjitā: |
Sarvadā sarvalōkēṣu tē bhavantu jinōttamā: ||17|| Kalāpakam |

देवदेवस्य यच्चक्रं तस्य चक्रस्य या विभा |
तयाच्छादितसर्वांगं मां मा हिंसन्तु पन्नगा: ||१८||
Dēvadēvasya yaccakraṁ tasya cakrasya yā vibhā |
Tayācchāditasarvāngaṁ māṁ mā hinsantu pannagā: ||18||

देवदेवस्य यच्चक्रं तस्य चक्रस्य या विभा |
तयाच्छादितसर्वांगं मां मा हिंसतु नागिनी ||१९||
Dēvadēvasya yaccakraṁ tasya cakrasya yā vibhā |
Tayācchāditasarvāngaṁ māṁ mā hinsatu nāginī ||19||

देवदेवस्य यच्चकं तस्य चक्रस्य या विभा |
तयाच्छादितसर्वांगं मां मा हिंसन्तु गोनसा: ||२०||
Dēvadēvasya yaccakaṁ tasya cakrasya yā vibhā |
Tayācchāditasarvāngaṁ māṁ mā hinsantu gōnasā: ||20||

देवदेव.------------ हिंसन्तु वृश्चिका: ||२१||
Dēvadēva.------------ Hinsantu vr̥ścikā: ||21||

देवदेव.------------ हिंसतु काकिनी ||२२||
Dēvadēva.------------ Hinsatu kākinī ||22||


All copyrights reserved © 2Alotus

देवदेव.------------ डाकिनी ||२३||

Dēvadēva.------------ Ḍākinī ||23||

देवदेव.------------ शाकिनी ||२४||

Dēvadēva.------------ Śākinī ||24||

देवदेव.------------ राकिनी ||२५||

Dēvadēva.------------Rākinī ||25||

देवदेव.------------ लाकिनी ||२६||

Dēvadēva.------------Lākinī ||26||

देवदेव.------------ शाकिनी ||२७||

Dēvadēva.------------Śākinī ||27||

देवदेव.------------ हाकिनी ||२८||

Dēvadēva.------------hākinī ||28||

देवदेव.------------ हिंसन्तु राक्षसा: ||२९||

Dēvadēva.------------ Hinsantu rākṣasā: ||29||

देवदेव.------------ व्यंतरा: ||३०||

Dēvadēva.------------Vyantarā: ||30||

देवदेव.------------ भेकसा: ||३१||

Dēvadēva.------------Bhēkasā: ||31||

देवदेव.------------ ते ग्रहा: ||३२||

Dēvadēva.------------ Tē grahā: ||32||

देवदेव.------------ तस्करा: ||३३||

Dēvadēva.------------Taskarā: ||33||


All copyrights reserved © 2Alotus

देवदेव.------------ वह्नय: ||34||

Dēvadēva.------------ Vahnaya: ||34||

देवदेव.------------ श्रृंगिण: ||३५||

Dēvadēva.------------Śr̥ṅgiṇa: ||35||

देवदेव.------------ दंष्ट्रिण: ||३६||

Dēvadēva.------------ danṣṭriṇa: ||36||

देवदेव.------------ रेलपा: ||३७||

Dēvadēva.------------Rēlapā: ||37||

देवदेव.------------ पक्षिण: ||३८||

Dēvadēva.------------Pakṣiṇa: ||38||

देवदेव.------------ मुद्गला: ||३९||

Dēvadēva.------------Mudgalā: ||39||

देवदेव.------------ जृंभका: ||४०||

Dēvadēva.------------ Jr̥mbhakā: ||40||

देवदेव.------------ तोयदा: ||४१||

Dēvadēva.-----------Tōyadā: ||41||

देवदेव.------------ सिंहका: ||४२||

Dēvadēva.------------Sinhakā: ||42||

देवदेव.------------ शूकरा: ||४३||

Dēvadēva.------------Śūkarā: ||43||

देवदेव.------------ चित्रका: ||४४||

Dēvadēva.-----------Citrakā: ||44||


All copyrights reserved © 2Alotus

देवदेव.------------ हस्तिन: ||४५||

Dēvadēva.-----------Hastina: ||45||

देवदेव.------------ भूमिपा: ||४६||

Dēvadēva.------------Bhūmipā: ||46||

देवदेव.------------ शत्रव: ||४७||

Dēvadēva.------------Śatrava: ||47||

देवदेव.------------ ग्रामिण: ||४८||

Dēvadēva.------------Grāmiṇa: ||48||

देवदेव.------------ दुर्जना: ||४९||

Dēvadēva.------------Durjanā: ||49||

देवदेव.------------ व्याधय: ||५०||

Dēvadēva.------------ Vyādhaya: ||50||

श्रीगौतमस्य या मुद्रा तस्या या भुवि लब्धय: |
ताभिरभ्यधिकं ज्योतिरर्ह: सर्वनिधीश्वर: ||५१||
Śrīgautamasya yā mudrā tasyā yā bhuvi labdhaya: |
Tābhirabhyadhikaṁ jyōtirar'ha: Sarvanidhīśvara: ||51||

पातालवासिनो देवा देवा भूपीठवासिन: |
स्व:स्वर्गवासिनो देवा सर्वे रक्षंतु मामित: ||५२||
Pātālavāsinō dēvā dēvā bhūpīṭhavāsina: |
Sva:Svargavāsinō dēvā sarvē rakṣantu māmita: ||52||

येऽवधिलब्धयो ये तु परमावधिलब्धय: |
ते सर्वे मुनयो दिव्या मां संरक्षन्तु सर्वत: ||५३||
Yēavadhilabdhayō yē tu paramāvadhilabdhaya: |
Tē sarvē munayō divyā māṁ sanrakṣantu sarvata: ||53||


All copyrights reserved © 2Alotus

ॐ श्री: ह्रीश्च धृतिर्लक्ष्मी गौरी चंडी सरस्वती |
जयाम्बा विजया क्लिन्नाऽजिता नित्या मदद्रवा ||५४||
Ōṁ śrī: Hrīśca dhr̥tirlakṣmī gaurī caṇḍī sarasvatī |
Jayāmbā vijayā klinnāajitā nityā madadravā ||54||

कामांगा कामवाणा च सानंदा नंदमालिनी |
माया मायाविनी रौद्री कला काली कलिप्रिया ||५५||
Kāmāṅgā kāmavāṇā ca sānandā nandamālinī |
Māyā māyāvinī raudrī kalā kālī kalipriyā ||55||

एता: सर्वा महादेव्यो वर्तन्ते या जगत्त्रये |
मम सर्वा: प्रयच्छंतु कान्तिंलक्ष्मीं धृतिं मतिम् ||५६||
Ētā: Sarvā mahādēvyō vartantē yā jagattrayē |
Mama sarvā: Prayacchantu kāntiṁ lakṣmīṁ dhr̥tiṁ matim ||56||

दुर्जना: भूतवेताला: पिशाचा-मुद्गलास्तथा |
ते सर्वे उपशाम्यंतु देवदेवप्रभावत: ||५७||
Durjanā: bhūtavētālā: Piśācā: mudgalāstathā |
Tē sarvē upaśāmyantu dēvadēvaprabhāvata: ||57||

दिव्यो गोप्य: सुदुष्प्राप्य: श्रीऋषिमंडलस्तव: |
भाषितस्तीर्थनाथेन जगत्त्राणकृतोऽनघ: ||५८||
Divyō gōpya: Suduṣprāpya: Śrīr̥ṣimaṇḍalastava: |
Bhāṣitastīrthanāthēna jagattrāṇakr̥tōanagha: ||58||

रणे राजकुले वह्नौ जले दुर्गे गजे हरौ |
श्मशाने विपिने घोरे स्मृतौ रक्षति मानवम् ||५९||
Raṇē rājakulē vahnau jalē durgē gajē harau |
Śmaśānē vipinē ghōrē smr̥tau rakṣati mānavam ||59||


All copyrights reserved © 2Alotus

राज्यभ्रष्टा निजं राज्यं पदभ्रष्टा निजं पदं |
लक्ष्मीभ्रष्टा: निजां लक्ष्मीं प्राप्नुवन्ति न संशय: ||६०||
Rājyabhraṣṭā nijaṁ rājyaṁ padabhraṣṭā nijaṁ padaṁ |
Lakṣmībhraṣṭā: Nijāṁ lakṣmīṁ prāpnuvanti na sanśaya: ||60||

भार्यार्थी लभते भार्या पुत्रार्थी लभते सुतम् |
धनार्थी लभते वित्तं नर: स्मरणमात्रत: ||६१||
Bhāryārthī labhatē bhāryā putrārthī labhatē sutam |
Dhanārthī labhatē vittaṁ nara: Smaraṇamātrata: |61||

स्वर्णे रूप्येऽथवा कांस्ये लिखित्वा यस्तु पूजयेत् |
तस्यैवेष्टमहासिद्धिर्गृहे वसति शाश्वती ||६२||
Svarṇē rūpyēathavā kānsyē likhitvā yastu pūjayēt |
Tasyaivēṣṭamahāsid'dhirgrahē vasati śāśvatī ||62||

भूर्जपत्रे लिखित्वेदं गलके मूर्ध्नि वा भुजे |
धारित: सर्वदा दिव्यं सर्वभीतिविनाशनम् ||६३||
Bhūrjapatrē likhitvēdaṁ galakē mūrdhni vā bhujē |
Dhārita: Sarvadā divyaṁ sarvabhītivināśanam ||63||

भूतै: प्रेतैर्ग्रहैर्यक्षै: पिशाचैर्मुद्गलैस्तथा |
वातपित्तकफोद्रेकैर्मुच्यते नात्र संशय: ||६४||
Bhūtai: Prētairgrahairyakṣai: Piśācairmudgalaistathā |
Vātapittakaphōdrēkairmucyatē nātra sanśaya: ||64||

भूर्भुव: स्वस्त्रयोपीठवर्तिन: शाश्वता जिना: |
तै: स्तुतैर्वन्दितैर्दृष्टैर्यत्फलं तत्फलं स्मृते: ||६५||
Bhūrbhuva: Svastrayōpīṭhavartina: Śāśvatā jinā: |
Tai: Stutairvanditairdr̥ṣṭairyatphalaṁ tatphalaṁ smr̥tē: ||65||


All copyrights reserved © 2Alotus

एतद्गोप्यं महास्तोत्रं न देयं यस्य कस्यचित् |
मिथ्यात्ववासिनो देयम् बाल-हत्या पदे पदे ||६६||
Ētadgōpyaṁ mahāstōtraṁ na dēyaṁ yasya kasyacit |
Mithyātvavāsinō dēyam bāla-hatyā padē padē ||66||

आचाम्लादितप: कृत्वा पूजयित्वा जिनावलिम् |
अष्टसाहस्रिको जाप्य: कार्यस्तत्सिद्धिहेतवे ||६७||
Ācāmlāditapa: Kr̥tvā pūjayitvā jināvalim |
Aṣṭasāhasrikō jāpya: Kāryastatsid'dhihētavē ||67||

शतमष्टोत्तरं प्रातर्ये पठंति दिने दिने |
तेषां न व्याधयो देहे प्रभवंति च सम्पद: ||६८||
Śatamaṣṭōttaraṁ prātaryē paṭhanti dinē dinē |
Tēṣāṁ na vyādhayō dēhē prabhavanti ca sampada: ||68||

अष्टामासावधिं यावत् प्रात: प्रातस्तु य: पठेत् |
स्तोत्रमेतन्महातेजस्त्वर्हद्बिम्बं स पश्यति ||६९||
Aṣṭāmāsāvadhiṁ yāvat prāta: Prātastu ya: Paṭhēt |
Stōtramētanmahātējastvar'hadbimbaṁ sa paśyati ||69||

दृष्टे सत्यार्हते बिंबे भवे सप्तमके ध्रुवम् |
पदं प्राप्नोति विश्रस्तं परमानंदसंपदां ||७०|| युग्मम्
Dr̥ṣṭē satyār'hatē bimbē bhavē saptamakē dhruvam |
Padaṁ prāpnōti viśrastaṁ paramānandasampadāṁ ||70|| Yugmam

इदं स्तोत्रं महास्तोत्रं स्तुतीनामुत्तमं परम् |
पठनात्स्मरणाज्जाप्यात् सर्वदोषैर्विमुच्चते ||७१||
Idaṁ stōtraṁ mahāstōtraṁ stutīnāmuttamaṁ param |
Paṭhanātsmaraṇājjāpyāt sarvadōṣairvimuccatē ||71||

*।। इति ऋषिमंडल-स्तोत्रम् संपूर्णम् ।।*

*|| Iti r̥ṣimaṇḍala-stōtram sampūrṇam ||*

* * * A * * *


All copyrights reserved © 2Alotus